कनीयान् चित्रको नाम भ्राता। श्वफल्कादक्रूरो गान्दिन्यामभवत्। इति विष्णुपुराणे ४ अंशे १४ अध्यायः॥

श्वभीरुः, पुं, (शुनः कुक्कुरात् भीरुर्भयशीलः।) शृगालः। इति शब्दमाला॥

श्वभ्र,क विले। गतौ। तङ्के। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-तङ्के अक०-सेट्।) विलं रन्ध्रकरणम्। क, श्वभ्रयति भाण्डं बालकः। तङ्क इति तकि दौःस्थ्ये इत्यस्य रूपम्। श्वभ्रयति दीनः दुःखेन जीवतीत्यर्थः। तङ्कस्थाने तन्त्र इत्यपपाठः। इति दुर्गादासः॥

श्वभ्रं, क्ली, (श्वभ्रति गर्द्दति। श्वभ्र विले+कर्म्मणि घञ्।) छिद्रम्। इत्यमरः॥ (यथा, मार्कण्डेये। ४३। २८।

"पततो यस्य वै गर्त्ते स्वप्ने द्वारं पिधीयते।
न चोत्तिष्ठति यः श्वभ्रात् तदन्तं तस्य जीवितम्॥")

श्वयथुः, पुं, (टु ओ श्वि गतिवृद्ध्योः+"ट्वितोऽथुच्।" ३। ३। ८९। अथुच्।) शोथः। इत्यमरः॥ (यथा, वृहत्संहितायाम्। ३२। १०।

"श्वयथुश्वासोन्मादज्वरकासभवा वणिक्पीड़ा॥")

श्वयीची, स्त्री, (श्वयतीति। श्वि गतिवृद्ध्योः+"श्वयतेश्चित्।"उणा० ४। ७१। इति ईचिः। वा ङीष्।) पीड़ा। इति सिद्धान्तकौमुदी॥

श्वल, वेगे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्। वकारयुक्तादिः। श्वलति। वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्वल्क, क भाषे। इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-सेट्।) वकारयुक्तस्तालव्यादिरन्तःस्थतृतीयोपधः। क, श्वल्कयति। भाषः कथनम्। इति दुर्गादासः॥

श्वल्ल, वेगे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) वकारयुक्तादिः लद्वयान्तः। श्वल्लति। वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्ववृत्तिः, स्त्री, (शुनः कुक्कुरस्येव पराधीना वृत्तिः।) सेवा। इत्यमरः॥ चाकरी इति भाषा। शुन इव वृत्तिः परपिण्डोपजीवनात्। इति भरतः॥ अपि च।

"सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्॥"
इति मानवे ४ अध्याये ६ श्लोकः॥

"सेवा तु दीनदृष्टिसन्दर्शनस्वामितर्ज्जननीचक्रियादिधर्म्मयोगात् शुन इव वृत्तिरतः श्ववृत्तिरुक्ता तस्मात्तां प्रकृतो ब्राह्मणस्त्यजेत्।" इति कुल्लूकभट्टः॥

श्वव्याघ्रः, पुं, (शुनो व्याघ्रः।) हिंस्रपशुः। यथा,
"शार्दूलः पुण्डरीकश्च द्वीपी चाथ मृगादनः।
श्वव्याघ्रश्च तरक्षुश्च व्याड़श्च श्वापदः समौ॥"
इति जटाधरः॥

श्वशुरः, पुं, (शु आशु अश्नुते व्याप्यते इति। अश+"आशुमेराशौ।"उणा० १। ४५। इति उरन्। "शुशब्दोऽत्राशुशब्दाभिधायी। आशु व्याप्यः श्वशुर इति धातुपारायणम्।" इति तट्टीकायां उज्ज्वलदत्तः॥) पतिपत्न्योः पिता। इत्यमरः॥ (यथा,—

"असारे खलु संसारे सारः श्वशुरमन्दिरम्।
हिमालये हरः शेते हरिः शेते महोदधौ॥"
इत्युद्भटः॥)

पूज्यः। इति मेदिनी॥

श्वशुरौ, पुं, (श्वश्रूश्च श्वशुरश्च तौ। "श्वशुरः श्वश्र्वा।" १। २। ७१। इति पाक्षिक एकशेषः।) श्वश्रूश्वशुरौ। द्विवचनान्तोऽयम्। इत्यमरः॥ श्वशुर शाशुड़ी इति भाषा॥

श्वशुर्य्यः, पुं, (श्वशुरस्यापत्यमिति। श्वशुर+"राजश्वशुराद् यत्।" ४। १। १३७। इति यत्।) देवरः। श्यालः। इत्यमरः॥ (यथा, कथासरित्सागरे। १९। ५७।

ददौ वैदेहदेशे च राज्यं गोपालकाय सः।
सत्कारहेतोर्न्न पतिः श्वशुर्य्यायानुगच्छते॥")

श्वश्रूः, स्त्री, (श्वशुरस्य स्त्री। श्वशुर+"श्वशुरस्योकारलोपश्च।"४। १। ६८। इत्यस्य वार्त्तिकोक्त्या ऊङ् उकारलोपश्च।) पतिपत्न्योः प्रसूः। इत्यमरः॥ शाशुड़ी इति भाषा॥ * ॥ तस्याः स्नुषाभिः सहाविश्वासकारणं यथा,—

धर्म्मव्याध उवाच।

"मया ते दुहिता दत्ता पुत्त्रार्थं वरवर्णिनी।
सा च त्वत्कार्थया प्रोक्ता दुहिता जन्तुघातिनः॥
अतोऽर्थमागतोऽहं ते गृहं प्रति समीक्षितुम्।
आचारं देवपूजाश्च अतिथीनाञ्च तर्पणम्॥
एतेषामेकमप्यत्र कुर्व्वन्नपि न दृश्यते।
तद्गृहं गन्तुमिच्छामि पितॄणां श्राद्धकाम्यया॥
त्वद्गृहे नैव भुञ्जामि पितॄणां कार्य्यमित्युत।
अहं व्याधो जीवघाती न तु तल्लोकहिंसकः॥
मत्सुता जीवघातस्य यदूढ़ा त्वत्सुतेन च।
त्वत्कृतत्वञ्च संप्राप्तं प्रायश्चित्तं तपोधन॥
एवमुक्त्वा स चोत्थाय शप्त्वा नारीं तदा धरे।
मा स्नुषाभिः समं श्वश्र्वा विश्वासो भवतु क्वचित्
मा च स्नुषा कदाचित् स्यात् या श्वश्रूं
जीवतीमिषेत्।
एवमुक्त्वा गतो व्याधः स्वगृहं प्रति भामिनि॥"
इति वाराहे आदिकृतवृत्तान्तनामाध्यायः॥

श्वश्रूश्वशुरौ, पुं, (श्वश्रूश्च श्वशुरश्च तौ।) श्वश्रूश्वशुरयोः सहोक्तिः। तत्पर्य्यायः। श्वशुरौ २। इत्यमरः॥

श्वस,ष लु प्राणने। इति कविकल्पद्रुमः॥(अदा०-पर०-अक०-सेट्।) "वकारयुक्तादिः। ष लु, श्वसिति लोकः जीवतीत्यर्थः। आश्वसंर्युनिशाचरान्। इति भट्टी। न विश्वसेत् पूर्व्वविरोधितस्येति। पञ्चतन्त्रे।
'न विश्वसेदविश्वस्तं विश्वस्ते नातिविश्वसेत्।'
इत्यादौ च गणकृतमनित्यमिति न्यायात् शपः श्लितौ साध्यम्। अथवा क्त्रादेराकृतिगणत्वात् तत्र द्रष्टव्यम्। वस्तुतस्तु "पञ्चभदित्वादनि श्वस इवाचरतीति क्वौ साध्यम्।" इति दुर्गादासः॥

श्वस, लु र स्वप्ने। इति कविकल्पद्रुमः॥(अदा०-पर०-अक०-सेट्।) लु, श्वसिति। र, वैदिकः। इति दुर्गादासः॥

श्वसनं, क्ली,(श्वस+ल्युट्।) श्वसितम्। निश्वासः। इति मेदिनी॥ (यथा, किराते। १०। ३४।

"श्वसनचलितपल्लवाधरोष्ठे
नवनिहितेर्ष्यमिवावधूनयन्ती॥" * ॥

स्पर्शनम्। इति श्रीधरस्वामी॥ यथा, भागवते २। २। २९।

"घ्राणेन गन्धं रसनेन वै रसं
रूपञ्च दृष्ट्या श्वसनं त्वचैव॥")

श्वसनः, पुं, श्वसितीति। श्वस+ल्युः।) वायुः। (यथा, वृहत्संहितायाम्। ३४। ७।

"इन्द्रयमवरुणनिर्ऋति-
श्वसनेशपितामहाग्निहुताः॥")

मदनवृक्षः। इत्यमरः॥

श्वसनाशनः, पुं, (श्वसनो वायुरशनं भक्ष्यं यस्य।) सर्पः। इति हारावली॥ (यथा, राजतरङ्गिण्याम्। १। २२५।

"जगाद तं द्विजश्चानं निश्वस्य श्वसनाशनः॥")

श्वसनेश्वरः, पुं, (श्वसन ईश्वरो यस्य।) अर्ज्जुनवृक्षः। इति शब्दचन्द्रिका॥

श्वसनोत्सुकः, पुं, (श्वसनाय उत्सुकः।) सर्पः। इति शब्दरत्नावली॥

श्वसितं, क्ली, (श्वस+क्तः।) श्वासः। यथा,—
"श्वासस्तु श्वसितं सोऽन्तर्मुखे उच्छ्वास आहरः
आनो वहिर्मुखस्तु स्यान्निःश्वासः पान एतनः॥
इति हेमचन्द्रः॥

श्वसुनः, पुं, (श्वस+बाहुलकात् उनन्।)त्ततघ्नवृक्षः। इति शब्दचन्द्रिका॥ कुकुरशोङ्गा इति भाषा॥

श्वस्तनं, त्रि, (श्वो भवम्। श्वस्+"एेषमोह्यः श्वसोऽन्यतरस्याम्।"४। २। १०५। इति त्यब्भावे ट्युट्युलौ तुट् च।) भविष्यद्वस्तु। इति शब्दमाला॥ (यथा, भागवते। ११। ८। १२।

"सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षुकः।
मक्षिका इव संगृह्णन् सह तेन विनश्यति॥")

भविष्यत्काले, क्ली। इति राजनिर्घण्टः॥

श्वस्त्यं त्रि, (श्वो भवमिति। श्वस्+"एेषमोह्यः श्वसोऽन्यतरस्याम्।"४।२।१०५। इति त्यप्।) श्वोभववस्तु। इति शब्दमाला॥

श्वा, [न्] पुं, (श्वयति गच्छतीति। श्विगतौ+"श्वन् उक्षन् पूषन्निति।" उणा० १। १५८। इति कनिन्प्रत्ययेन साधु।) कुक्कुरः। तत्पर्य्यायः।
"कुक्कुरः श्वा च भषकः शुनको मृगदंशकः।
कौलेयको रन्तिदेवः सारमेयो रतव्रणः॥
"कुक्कुरो दीर्घसुरतः श्वाणो ग्रामसृगोऽपि च।
वक्रपुच्छः शयालुः स्यात् शरत्कामश्वरतत्त्वपः॥
कौक्षधादियोगितः श्वा स्यादलर्कोऽप्यलर्ककः।